www.vidyarthiplus.com

**SL. No. : DD**

ಒಟ್ಟು ಪ್ರಶ್ನೆಗಳ ಸಂಖ್ಯೆ : 63 ]
Total No. of Questions : 63 ]

**CCE PR**
**UN-REVISED**

[ ಒಟ್ಟು ಮುದ್ರಿತ ಪುಟಗಳ ಸಂಖ್ಯೆ : 8
[ Total No. of Printed Pages : 8

**ಸಂಕೇತ ಸಂಖ್ಯೆ : 16-S**

**Code No. : 16-S**

# ವಿಷಯ : ಪ್ರಥಮ ಭಾಷೆ — ಸಂಸ್ಕೃತ
# Subject : First Language — SANSKRIT
# प्रथम भाषा — संस्कृतम्

**( ಹೊಸ ಪಠ್ಯಕ್ರಮ / New Syllabus )**

**( ಪುನರಾವರ್ತಿತ ಖಾಸಗಿ ಅಭ್ಯರ್ಥಿ / Private Repeater )**

ದಿನಾಂಕ : 23. 03. 2018 ]
[ Date : 23. 03. 2018

ಸಮಯ : ಬೆಳಿಗ್ಗೆ 9-30 ರಿಂದ ಮಧ್ಯಾಹ್ನ-12-45 ರವರೆಗೆ ]
[ Time : 9-30 A.M. to 12-45 P.M.

ಗರಿಷ್ಠ ಅಂಕಗಳು : 125 ]
[ Max. Marks : 125

## *ಪರೀಕ್ಷಾರ್ಥಿಗಳಿಗೆ ಸಾಮಾನ್ಯ ಸೂಚನೆಗಳು :*

1. ಈ ಪ್ರಶ್ನೆಪತ್ರಿಕೆಯು 63 ವಸ್ತುನಿಷ್ಠ ಮತ್ತು ವಿಷಯನಿಷ್ಠ ಮಾದರಿಯ ಪ್ರಶ್ನೆಗಳನು–ಹೊಂದಿದೆ.
2. ಈ ಪ್ರಶ್ನೆಪತ್ರಿಕೆಯನು–ಹಿಮ್ಮುಖ ಜಾಕೆಟ್ ಮೂಲಕ ಮೊಹರು (ಸೀಲ್) ಮಾಡಲಾಗಿದೆ. ಪರೀಕ್ಷೆ ಪ್ರಾರಂಭವಾಗುವ ಸಮಯಕ್ಕೆ ನಿಮ್ಮ ಪ್ರಶ್ನೆಪತ್ರಿಕೆಯ ಬಲಬದಿ ಪಾರ್ಶ್ವವನು– ಕತ್ತರಿಸಿ, ಪ್ರಶ್ನೆಪತ್ರಿಕೆಯಲ್ಲಿ ಎಲ್ಲಾ ಪುಟಗಳು ಇವೆಯೇ ಎಂದು ಪರೀಕ್ಷಿಸಿಕೊಳ್ಳಿ.
3. ವಸ್ತುನಿಷ್ಠ ಮತ್ತು ವಿಷಯನಿಷ್ಠ ಮಾದರಿಯ ಪ್ರಶ್ನೆಗಳಿಗೆ ಕೊಟ್ಟಿರುವ ಸೂಚನೆಗಳನು–ಪಾಲಿಸಿ.
4. ಬಲ ಭಾಗದಲ್ಲಿ ಕೊಟ್ಟಿರುವ ಅಂಕಗಳು ಪ್ರಶ್ನೆಗಳಿಗಿರುವ ಪೂರ್ಣ ಅಂಕಗಳನು–ತೋರಿಸುತ್ತವೆ.
5. ಪ್ರಶ್ನೆಪತ್ರಿಕೆಯನು– ಓದಿಕೊಳ್ಳಲು 15 ನಿಮಿಷಗಳ ಕಾಲಾವಕಾಶವು ಸೇರಿದಂತೆ, ಉತ್ತರಿಸಲು ನಿಗದಿಪಡಿಸಲಾದ ಸಮಯವನು–ಪ್ರಶ್ನೆಪತ್ರಿಕೆಯ ಮೇಲ್ಭಾಗದಲ್ಲಿ ಕೊಡಲಾಗಿದೆ.

## *छात्रं प्रति सामान्यनियमाः*

1. अस्मिन् प्रश्नपत्रे त्रिषष्टिः (63) वस्तुनिष्ठाः व्यक्तिनिष्ठाश्च प्रश्नाः सन्ति ।
2. इदं प्रश्नपत्रं विपरीतेन आवरणेन मुद्रिताङ्कमस्ति । परीक्षासमये प्रश्नपत्रमुद्घाटयितुं कर्तय । प्रश्नपत्रस्य पृष्ठानि पूर्णानि सन्ति इति पर्यालोचय ।
3. व्यक्तिनिष्ठानां वस्तुनिष्ठानाञ्च प्रश्नानां विषये निर्दिष्टाः नियमाः अनुपालनीयाः ।
4. प्रश्नानां प्रति अधिकतयाः अङ्काः पार्श्वे लिखिताः सन्ति ।
5. प्रश्नपत्रमुत्तरयितुं निर्धारिता समयावधिः प्रश्नपत्रस्य उपरि भागे लिखितः अस्ति । यस्मिन् पञ्चदशपलानि प्रश्नपत्रस्य पठनार्थं निर्धारितानि सन्ति ।

इतः कर्तय

**TEAR HERE TO OPEN THE QUESTION PAPER**
प्रश्नपत्रमुद्घाटयितुमितः कर्तय

**Tear here**



www.vidyarthiplus.com

www.vidyarthiplus.com



## भागः - A

### ( गद्य-पद्य-पूरकपाठाः )

### ( 79 अङ्काः )

I. एकवाक्येन उत्तरं लिखत — 16 × 1 = 16

1. विज्ञानप्रदर्शिनी कया आयोजिता ?
2. संस्कृतसाहित्ये ज्ञानपीठप्रशस्तिपुरस्कृतः कः ?
3. इन्द्रः वज्रायुधेन कं जघान ?
4. 'राधेयः' इति विश्रुतः कः ?
5. मोक्षस्य प्राप्तिः केन भवति ?
6. भारतमाता कैः पूजिता ?
7. केसरी कुत्र राज्यं पालयति स्म ?
8. वारिमुचः कीदृशं जलं पिबन्ति ?
9. उप्तं बीजं केन विना निष्फलं भवति ?
10. ध्रुवस्य पितुः नाम किम् ?
11. द्यूतक्रीडायां के पराजिताः ?
12. कः मुनिः त्यागधनः इति प्रसिद्धः ?
13. सर्वोऽपि जीवराशिः कस्मात् बलं प्राप्नोति ?
14. अघोरसंज्ञः कः ?
15. ध्रुवः नारायणं साक्षात्कर्तुं कुत्र प्रस्थितः ?
16. सम्पदः कं वृणते ?

II. चतुर्थपदं लिखत — 4 × 1 = 4

17. वाग्भटः — अष्टाङ्गसङ्ग्रहः, चरकः — ......................... ।
18. रमारमणः — विष्णुः, दाक्षायणीरमणः — ........................... ।
19. हास्यम् — हासः, करुणः — ........................... ।
20. नित्यस्नानेन — श्रीपुष्ट्यारोग्यवर्धनम्, आदित्यनमस्कारेण — ........................... ।



www.vidyarthiplus.com

www.vidyarthiplus.com



III. लघूत्तराणि संस्कृतभाषया लिखत – 5 × 2 = 10

21. सूर्यस्य विषये तैत्तिरीये किं लिखितमस्ति ?

22. डा० सत्यव्रतशास्त्रिमहोदयः कदा कुत्र अजायत ?

23. अशरीरिणी वाणी का ?

24. दैवपुरुषकारयोः विषये भीष्मेण किम् उक्तम् ?

**अथवा**

मानवः निर्वेदं कथम् आप्नोति ? ततः सः किं कुरुते ?

25. दधीचिमुनेः तपोवनं वर्णयत ।

IV. श्लोकतात्पर्यं कर्णाटकभाषया, आङ्ग्लभाषया, संस्कृतभाषया वा लिखत – 3 × 2 = 6

26. ईशावास्यमिदं सर्वं यत्किञ्च जगत्यां जगत् ।
तेन त्यक्तेन भुञ्जीथाः मा गृधः कस्यस्विद्धनम् ।।

**अथवा**

यस्तु सर्वाणि भूतानि आत्मन्येवानुपश्यति ।
सर्वभूतेषु चात्मानं ततो न विजुगुप्सते ।।

27. यत्र कुत्र वा वयं समग्रभारते स्थिता
भाषयापि धर्मतश्च भिन्नमार्गमाश्रिताः ।
आदितश्च मध्यतस्तथान्ततश्च भारता
भारतीयभावनेति वृद्धिमेतु भारते ।।

28. इन्द्रः करीन्द्रमारुह्य राहुं कृत्वा पुरःसरम् ।
प्रायात् यत्राभवत् सूर्यः सहानेन हनूमता ।।

V. कव्योः देश-काल-कृतीनां विषये लिखत – 2 × 3 = 6

29. विद्वान् हेच्०वि० नागराजराव् ।

30. भरतमुनिः ।

VI. यथानिर्देशम् उत्तरं लिखत – 3 × 3 = 9

31. सः महर्षिः धर्मात्मा उदारश्च ।
कः पाठः ? कः अवदत् ? धर्मात्मा कः ?

32. भगवन्, किमिच्छसि ? किमहं ददानि ?
कः पाठः ? कः अवदत् ? कम् अवदत् ?

**अथवा**

सागर इव तिष्ठतु ते यशः ।
कः पाठः ? कः अवदत् ? कस्य यशः ?

33. रसे गन्धे न रज्यते ।
कः पाठः ? कः अवदत् ? कः न रज्यते ?



www.vidyarthiplus.com

www.vidyarthiplus.com



VII. दशवाक्यैः उत्तरं कर्णाटकभाषया, आङ्ग्लभाषया, संस्कृतभाषया वा लिखत – 4 × 4 = 16

34. 'नगाधिराजः' इति पाठे अमरनाथगुहाविषये का पुराणकथा अस्ति ? सङ्गृह्य लिखत ।

35. धारानगरस्य राजा मुञ्जः भोजं किमर्थं मारयितुं यतते ?

**अथवा**

वत्सराजः भोजं कथं रक्षति ? विवृणुत ।

36. 'मारुतेः महिमा' इति पाठे निरूपितं मारुतेः बाल्यजीवनं विवृणुत ।

37. डा० सत्यव्रतशास्त्रिमहोदयस्य बाल्यं विद्याभ्यासं च विवृणुत ।

VIII. पद्यपूरणं कुरुत – 2 × 4 = 8

38. न चोरहार्यं ..............................................................................

...............................................................................................।

...............................................................................................

.............................................................................. सर्वधनप्रधानम् ।।

39. दूरीकरोति ..............................................................................

...............................................................................................।

...............................................................................................

.............................................................................. आतनोति ।।

IX. अधोलिखितम् अनुच्छेदं पठित्वा अनुच्छेदाधारितान् प्रश्नान् उत्तरत – 4 × 1 = 4

40. डा० राधाकृष्णन् महाभागः क्रि०श० 1888 तमे वर्षे अजायत । आन्ध्रप्रदेशस्य चित्तूरुमण्डले विद्यमानः तिरुत्तणिग्रामः तस्य जन्मस्थानम् । अस्य पिता सर्वपल्ली वीरस्वामी । माता सीतम्मा । तस्य प्राथमिकविद्याभ्यासः तिरुत्तणिग्रामे अभवत् । सः भारतीयविद्यया संस्कृत्या च प्रभावितः आसीत् । विद्याभ्याससमये गुरुजनाः तं 'मेधावी छात्रः' इति प्रशंसन्ति स्म । सः दर्शनशास्त्रैः विशेषरूपेण आकृष्टः । अध्ययनानन्तरं सः स्वस्य अध्यापकवृत्तिं मद्रासनगरे प्रारभत । क्रि०श० 1918 तमे वर्षे एषः मैसूरुविश्वविद्यालये दर्शनशास्त्रस्य प्राध्यापकः अभवत् । क्रि०श० 1962 तमे वर्षे भारतस्य द्वितीयः राष्ट्राध्यक्षः बभूव । तस्य इच्छानुसारेण आदर्शशिक्षकस्य अस्य जन्मदिनम् अधुना 'शिक्षकदिनोत्सवः' इति आचर्यते ।

i) राधाकृष्णन् महाभागः कदा अजायत ?

ii) राधाकृष्णन् महाभागस्य प्राथमिकविद्याभ्यासः कुत्र अभवत् ?

iii) विद्याभ्याससमये गुरुजनाः तं किमिति प्रशंसन्ति स्म ?

iv) भारतस्य द्वितीयः राष्ट्राध्यक्षः कः ?



www.vidyarthiplus.com

www.vidyarthiplus.com



## भागः - B

### (व्याकरणविभागः)

### (30 अङ्काः)

X. निम्नलिखितेषु प्रश्नेषु अपूर्णविवरणेषु वा प्रत्येकं चत्वारः विकल्पाः प्रदत्ताः । तेषु एकमेव शुद्धं उपयुक्तं वा वर्तते । सम्यक् उत्तरस्य चयनं कृत्वा क्रमाक्षरेणसह लिखत — $10 \times 1 = 10$

41. दशरथपुत्रः – अत्र एषः समासः वर्तते —
    (A) कर्मधारयः (B) तत्पुरुषः
    (C) द्विगुः (D) अव्ययीभावः ।
42. धेनुर्धावति – अत्र विसर्गस्थाने एषः आदेशः वर्तते —
    (A) रेफादेशः (B) उकारादेशः
    (C) सकारादेशः (D) लोपादेशः ।
43. गुरवे – अत्र एषा विभक्तिः वर्तते —
    (A) प्रथमा (B) द्वितीया
    (C) तृतीया (D) चतुर्थी ।
44. विधेयः – अस्य स्त्रीलिङ्गरूपम् इदं भवति —
    (A) विधेयी (B) विधयी
    (C) विधेया (D) विधिया ।
45. अत्र समूहेतरपदम् इदं भवति —
    (A) प्राप्तोदकः (B) प्रतिवर्षम्
    (C) फालचन्द्रः (D) प्रभूतसलिलम् ।
46. वर्तन्ते – अत्र एषः लकारः वर्तते —
    (A) लट् (B) लिट्
    (C) लृट् (D) लोट् ।
47. द्वेषः – अस्य विरुद्धार्थकपदम् इदं भवति —
    (A) गीतिः (B) रीतिः
    (C) प्रीतिः (D) नीतिः ।
48. एतदुपरि – अत्र सन्धिविभजने रूपम् इदं भवति —
    (A) एत + उपरि (B) एतत् + उपरि
    (C) एतद + उपरि (D) एत + दुपरि ।
49. ओजः – अस्य समानार्थकपदम् इदं भवति —
    (A) कान्तिः (B) क्रान्तिः
    (C) शान्तिः (D) भ्रान्तिः ।
50. एषु व्याकरणशुद्धं वाक्यम् इदं भवति —
    (A) वीरं युद्धं रोचते (B) वीराय युद्धं रोचते
    (C) वीरेण युद्धं रोचते (D) वीरस्य युद्धं रोचते ।



www.vidyarthiplus.com

www.vidyarthiplus.com



51. वाक्ये विद्यमानं कृदन्तपदं चित्वा प्रत्ययस्य नाम लिखत – $2 \times 1 = 2$

    a) सुधा पाठं पठित्वा लिखति ।

    b) छात्रः शालां गतवान् ।

52. प्रयोगपरिवर्तनं कुरुत – $2 \times 1 = 2$

    a) बालकः धावति ।

    b) मया जलं पीतम् ।

53. रेखाङ्कितपदम् अवलम्ब्य प्रश्ननिर्माणं कुरुत – $2 \times 1 = 2$

    a) सिंहः <u>वने</u> वसति ।

    b) <u>शल्यकर्णौ</u> रथारोहणं कुरुतः ।

54. सन्धिं विभज्य नाम लिखत – $2 \times 1 = 2$

    a) तच्चेष्टया

    b) पुत्रोऽहम् ।

55. लिङ्गविभक्तिवचनानि लिखत – $2 \times 1 = 2$

    a) राजन्

    b) उपनिषदा ।

56. लकारपुरुषवचनानि लिखत – $2 \times 1 = 2$

    a) याचसे

    b) लिखतु ।

57. विग्रहवाक्यं विलिख्य समासनाम लिखत – $2 \times 1 = 2$

    a) धनधान्यतैललवणानि

    b) कपिशार्दूलः ।

XI. वाक्ये विद्यमानं अलङ्कारं सलक्षणं विवृणुत – 3

58. सैन्धवमानय ।

XII. प्रस्तारं विलिख्य गणविभागं कृत्वा छन्दोनाम लिखत – 3

59. स्वयं न खादन्ति फलानि वृक्षाः ।



www.vidyarthiplus.com

www.vidyarthiplus.com



## भागः - C

### (रचनाविभागः)

### (16 अङ्काः)

XIII. संस्कृतभाषया अनुवादं कुरुत — 3

60. ಮಾನವನು ಪ್ರತಿದಿನ ವ್ಯಾಯಾಮವನು– ಮಾಡಬೇಕು. ಇದರಿಂದ ಅವನ ಆರೋಗ್ಯವು ವರ್ಧಿಸುತ್ತದೆ. ಆರೋಗ್ಯವಂತ ಮಾನವನು ಜೀವನದಲ್ಲಿ ಸಂತೋಷಯವನು–ಹೊಂದುತ್ತಾನೆ.

Man should exercise everyday. His health improves as a result of this. A healthy man attains happiness in his life.

XIV. कर्णाटकभाषया, आङ्ग्लभाषया वा अनुवादं कुरुत – 3

61. भारतदेशः कृषिप्रधानः देशः वर्तते । परन्तु अद्य तरुणाः कृषिकार्ये अनासक्ताः सन्ति । अतः कृषिक्षेत्रे प्रगतिः नैव दृश्यते ।

XV. पत्रं लिखत – 5

62. दिनद्वयं विरामं प्रार्थ्य वर्गोपाध्यायं प्रति विरामपत्रं लिखत ।

**अथवा**

पुस्तकप्रेषणाय आवेदनपत्रं लिखत ।

XVI. 63. एकं विषयम् अधिकृत्य प्रबन्धं लिखत – 5

i) भारतीयविज्ञानम्

ii) समाचारपत्रम्

iii) स्वतन्त्रदिनम् ।



www.vidyarthiplus.com

www.vidyarthiplus.com





www.vidyarthiplus.com